॥ श्रीगोपीजनवल्लभाय नमः ॥

अथ पुरुषोत्तमसहस्रनाम

श्रीकृष्णप्रिया बेटीजी महाराज
राधामोहन कुंज नं० ३२।३९
भैरोनाथ, बनारस ।

सं० २०१० वैशाख
प्रथम ५००

न्यो० ।)

मुद्रक—बालकृष्ण शास्त्री,
ज्योतिष प्रकाश प्रेस, विश्वेश्वरगंज, बनारस।

❀ श्री गोपीजनवल्लभायनमः ❀

'श्रीमहाप्रभुजीकृत ग्रन्थाः'

अथ पुरुषोत्तमनाम सहस्त्रम्

पुराणपुरुषो विष्णुः पुरुषोत्तम उच्यते । नाम्नां सहस्रं वक्ष्यामि तस्य भागवतोद्धृतम् ॥ १ ॥ यस्य प्रसादाद्वागीशाः प्रजेशाविभवो नताः । क्षुद्रा अपि भवंत्याशु श्रीकृष्णं तं नतोऽस्म्यहम् ॥२॥अनन्ताएव कृष्णस्य लीलानाम प्रवर्तिकाः । उक्ता भागवते गूढाः प्रकटा अपि कुत्रचित् ॥ ३ ॥ अतस्तानि प्रवक्ष्यामि नामानि मुरवैरिणः । सहस्रं यैस्तु पठितं पठितं स्याच्छुकामृतम् ॥ ४ ॥ कृष्णनामसहस्रस्य ऋषिरग्निर्निरूपितः । गायत्री च तथा छंदो देवता पुरुषोत्तमः ॥५॥ विनियोगः समस्तेषु पुरुषार्थेषु वैमतः । वीजं भक्तप्रियः शक्तिः

सत्यवागुच्यते हरिः ॥ ६ ॥ भक्तोद्धरणयत्नस्तु मंत्रोऽत्रपरमोमतः । अवतारितभक्तांश कीलकं परिकीर्तितम् ॥ ७ ॥ अस्त्रं सर्वसमर्थश्च गोविन्दः कवचं मतम् । पुरुषोध्यानमंत्रोक्तं सिद्धिः शरणसंस्मृतिः ॥८॥

॥ अथ प्रथमस्कन्धस्थनामानि ॥

श्रीकृष्णः सच्चिदानन्दो नित्यलीलाविनोदकृत् । सर्वागमविनोदीच लक्ष्मीशः पुरुषोत्तमः ॥९॥ आदिकालः सर्वकालः कालात्मा मायया वृतः । भक्तोद्धार प्रयत्नात्मा जगत्कर्त्ता जगन्मयः ॥१०॥ नाम लीलाधरो विष्णुर्व्यासात्मा शुकमोक्षदः । व्यापि वैकुण्ठदाताच श्रीमद्भागवतागमः॥११॥शुकवागमृताब्धीन्दुः शौनकाद्यखिलेष्टदः । भक्तिप्रवर्तकस्त्राता व्यासचिन्ताविनाशकः ॥ १२ ॥ सर्वसिद्धान्तवागात्मा नारदाद्यखिलेष्टदः । अंतरात्मा ध्यानगम्यो भक्तिरत्न प्रदापकः ॥ १३ ॥

मुक्तोपसृप्यः पूर्णात्मा मुक्तानां रतिवर्धनः ।
भक्तकार्यैकनिरतो द्रौण्यस्त्रविनिवारकः ॥१४॥
भक्तस्मयप्रणेता च भक्तवाक् परिपालकः । ब्रह्म-
ण्यदेवो धर्मात्मा भक्तानां च परीक्षकः ॥१५॥
आसन्नहितकर्ताच मायाहितकरः प्रभुः ।
उत्तरा प्राणदाताच ब्रह्मास्त्रविनिवारकः ॥१६॥
सर्वतः पांडवपतिः परीक्षिच्छुद्धिकारणं ।
गूढात्मा सर्ववेदेषु भक्तैकहृदयंगमः ॥ १७ ॥
कुन्तीस्तुत्यः प्रसन्नात्मा परमाद्भुतकार्यकृत् ।
भीष्ममुक्तिप्रदः स्वामी भक्तमोहनिवारकः
॥१८॥ सर्वावस्थासु संसेव्यः समः सुखहित-
प्रदः । कृतकृत्यः सर्वसाक्षी भक्तस्त्रीरतिवर्धनः
॥ १९ ॥ सर्वसौभाग्यनिलयः परमाश्चर्यरूप-
धृक् । अनन्यपुरुष स्वामी द्वारकाभाग्यभाजनः
॥२०॥ बीजसंस्कारकर्त्ता च परीक्षित् ज्ञान-
पोषकः । सर्वत्र पूर्णगुणकः सर्वभूषणभूषितः
॥२१॥ सर्वलक्षणदाता च धृतराष्ट्रविमुक्तिदः ।

सन्मार्गरक्षको नित्यं विदुरप्रीतिपूरकः ॥२२॥
लीलाव्यामोहकर्त्ताच कालधर्मप्रवर्तकः ।
पाण्डवानां मोक्षदाता परीक्षिद्भाग्यवर्धनः॥२३॥
कलिनिग्रहकर्त्ताचधर्मादीनां च पोषकः ।
सत्संग ज्ञानहेतुश्च श्रीभागवतकारणम् ॥२४॥

* द्वितीयस्कन्धस्थनामानि *

प्राकृताद्दृष्टमार्गश्च श्रोतव्यः सकलागमैः । कीर्तितव्यः शुद्धभावैः स्मर्तव्यश्चात्मवित्तमैः ॥२५॥ अनेकमार्गकर्त्ता च नानाविधगतिप्रदः । पुरुषः सकलाधारः सत्वैक निलयात्मभूः ॥२६॥ सर्वध्येयो योगगम्यो भक्त्याग्राह्यः सुरप्रियः । जन्मादिसार्थककृतिर्लीलाकर्ता पतिः सताम् ॥ २७ ॥ आदिकर्ता तत्त्वकर्त्ता सर्वकर्ता विशारदः नानावतारकर्ता च ब्रह्माविर्भावकारणं ॥२८॥ दशलीलाविनोदी च नानासृष्टिप्रवर्तकः । अनेककल्पकर्त्ता च सर्वदोषविवर्जितः ॥ २९ ॥

"तृतीयस्कन्धस्थनामानि"

वैराग्यहेतुस्तीर्थात्मा सर्वतीर्थफलप्रदः ।
तीर्थशुद्धैकनिलयः स्वमार्गपरिपोषकः ॥३०॥
तीर्थकीर्तिः भक्तगम्यो भक्तानुशयकार्यकृत ।
भक्ततुल्यः सर्वतुल्यः सर्वस्वेच्छाप्रवर्तकः ॥३१॥
गुणातीतोऽनवद्यात्मा सर्गलीलाप्रवर्तकः ।
साक्षात्सर्वजगत्कर्त्ता महदादिप्रवर्तकः ॥३२॥
मायाप्रवर्तकः साक्षी मायारतिविवर्धनः । आकाशात्माचतुर्मूर्तिश्चतुर्धाभूतभावनः॥३३॥रजः-
प्रवर्तको ब्रह्मा मरीच्यादिपितामहः । वेदकर्त्ता
यज्ञकर्त्ता सर्वकर्त्ताऽमितात्मकः ॥ ३४ ॥
अनेकसृष्टिकर्ता च दशधासृष्टिकारकः । यज्ञांगो
यज्ञवाराहो भूधरो भूमिपालकः॥३५॥सेतुर्विघ-
रणो जैत्रो हिरण्याक्षांतकः सुरः । दितिर्कश्यप-
कामैकहेतुः सृष्टिप्रर्वतकः ॥३६॥ देवाभय-
प्रदाता च वैकुंठाधिपतिर्महान् ॥ सर्वगर्वप्रहारी
च सनकाद्यखिलार्थदः ॥३७॥ सर्वाश्वासन-

कर्ता च भक्तुल्याहवप्रदः । काललक्षणहेतुश्च सर्वार्थज्ञापकः परः ॥३८॥ भक्तोन्नतिकरः सर्व-प्रकारसुखदायकः । नानायुद्धप्रहरणो ब्रह्म शापविमोचकः ॥ ३९ ॥ पुष्टिसर्गप्रणेताच गुण सृष्टिप्रवर्तकः । कर्दमेष्टप्रदाता च देवहूत्यखि-लार्थदः ॥४०॥ शुक्लनारायणः सत्यकालधर्म प्रवर्तकः । ज्ञानावतारः शांतात्मा कपिलः काल-नाशकः । त्रिगुणाधिपतिः सांख्यशास्त्रकर्ता विशारदः । सर्गदूषणहारी च पुष्टि मोक्षपवर्तकः ॥४२॥ लौकिकानंददाता च ब्रह्मानंदप्रवर्तकः । भक्तिसिद्धांतवक्ता च सगुणज्ञानदीपकः ॥४३॥ आत्मप्रदः पूर्णकामो योगात्मा योगभावितः । जीवन्मुक्तिप्रदः श्रीमानन्यभक्तिः प्रवर्तकः ॥४४॥ कालसामर्थ्यदाता च कालदोष-निवारकः । गर्भोत्तम ज्ञानदाता कर्ममार्ग-नियामकः ॥४५॥ सर्वमार्गनिराकर्त्ता भक्ति मार्गैकपोषकः । सिद्धिहेतुः सर्वहेतुः सर्वाश्च-

यैंककारणम् ॥४६॥ चेतनाचेतनपतिः समुद्र-परिपूजितः । सांख्याचार्यस्तुतः सिद्धपूजितः सर्वपूजितः ॥४७॥

अतः परं चतुर्थस्कन्धस्थनामानि । बिसर्ग-कर्ता सर्वेशः कोटिसूर्यसमप्रभः । अनन्तगुण-गंभीरो महापुरुषपूजितः ॥४८॥ अनन्तसुख-दाता च ब्रह्मकोटिप्रजापतिः । सुधाकोटि-स्वास्थ्यहेतुः कामधुक्कोटिकामदः ॥४९॥ समुद्र-कोटिगंभीरस्तीर्थकोटिसमाह्वयः । सुमेरुकोटि-निष्कंपः कोटिब्रह्मांडविग्रहः ॥५०॥ कोट्यश्व-मेधपापघ्नो वायुकोटिमहाबलः । कोटीन्दुजगदा-नंदी शिवकोटिप्रसादकृत् ॥५१॥ सर्वसद्गुण-माहात्म्यः सर्वसद्गुणभाजनः मन्वादिप्रेरको धर्मो यज्ञनारायणः परः ॥५२॥ आकूतिसूनुर्दे-वेंद्रो रुचिजन्माऽभयप्रदः । दक्षिणापतिरोजस्वी क्रियाशक्तिः परायणः ॥ ५३ ॥ दत्तात्रेयो योगपतिर्योगमार्गप्रवर्तकः । अनसूयागर्भ-

रत्नमृषिवंशविवर्धनः ॥५४॥ गुणत्रयविभाग-
ज्ञश्चतुर्वर्गविशारदः । नारायणो धर्मसूनुः
पुण्यमूर्तिर्यशस्करः ॥५५॥ सहस्रकवचच्छेदी
तपःसारो नरप्रियः । विश्वानन्दप्रदः कर्म-
साक्षी भारतपूजितः॥५६॥अनंताद्भुतमाहात्म्यो
बदरीस्थानभूषणम् । जितकामो जितक्रोधो
जितसंगो जितेंद्रियः ॥५७॥ उर्वशीप्रभवः
स्वर्गसुखदायी स्थितिप्रदः । अमानी मानदो
गोप्ता भगवच्छास्त्रबोधकः ॥५८॥ ब्रह्मादिवंद्यो
हंसः श्रीर्मायावैभवकारणम् । विविधानंत-
सर्गात्मा विश्वपूरणतत्परः ॥५९॥ यज्ञजीवन-
हेतुश्च यज्ञस्वाभीष्टबोधकः । नानासिद्धान्तगम्य-
श्च सप्ततंतुश्च षड्गुणः॥६०॥ प्रतिसर्गजग-
त्कर्त्ता नानालीलाविशारदः । ध्रुवप्रियो ध्रुवस्वामी
चिंतिताधिकदायकः ॥६१॥ दुर्लभानंतफलदो
दयानिधिरमित्रहा । अंगस्वामी कृपासारो
वैन्यो भूमिनियामकः ॥६२॥ भूमिदोग्धा प्रजा-

प्राणपालनैकपरायणः । यशोदाता ज्ञानदाता सर्वधर्मप्रदर्शकः ॥६३॥ पुरंजनो जगन्मित्रं विसर्गान्तप्रदर्शकः । प्रचेतसां पतिश्चित्रभक्ति-हेतुजनार्दनः ॥६४॥

अतःपरं पंचस्कन्धस्थनामानि

स्मृतिहेतुर्ब्रह्मभाव सायुज्यादिप्रदः शुभः । विजयी स्थितिलीलाब्धिरच्युतो विजयप्रदः ॥ ६५ ॥ स्वसामर्थ्यप्रदो भक्तकीर्तिहेतुरधोक्षजः । प्रियव्रतप्रियस्वामी स्वेच्छावादविशारदः ॥६६॥ संज्ञ गम्यः स्वप्रकाशः सर्वसंगविवर्जितः । इच्छायां स समर्यादस्त्यागमात्रोपलंभनः ॥६७॥ अचिन्त्यकार्यकर्त्ता च तर्कागोचर-कार्यकृत्शृंगाररसमर्यादा आग्नीध्ररसभाजनम् ॥६८॥ नाभीष्टपूरकः कर्ममर्यादादर्शनोत्सुकः । सर्वरूपोऽद्भुततमो मर्यादापुरुषोत्तमः ॥६९॥ सर्वरूपेषुसत्यात्मा कालसाक्षी शशिप्रभः । मेरु-देवीव्रतफलमृषभो भगलक्षणः ॥७०॥ जगत्सं-

तर्पको मेघरूपी देवेन्द्रदर्पहा । जयन्तीपतिर-
त्यंतप्रमाणाशेषलौकिकः ॥७१॥ शतधान्यस्त-
भूतात्मा शतानन्दो गुणप्रसूः । वैष्णवोत्पादन-
परः सर्वधर्मोपदेशकः ॥७२॥ परहंसक्रिया-
गोप्ता योगचर्याप्रदर्शकः । चतुर्थाश्रमनिर्णेता
सदानन्द शरीरवान् ॥७३॥ प्रदर्शितान्यधर्मश्च
भरतस्वाम्यपारकृत् । यथावत्कर्मकर्ता च
संगानिष्टप्रदर्शकः ॥७४॥ आवश्यक पुन-
र्जन्म कर्ममार्गप्रदर्शकः । यज्ञरूपमृगः शान्तः
सहिष्णुः सत्पराक्रमः ॥७५॥ रहूगणगतिज्ञश्च
रहूगणविमोचकः । भवाटवीतत्त्ववक्ता वहि-
र्मुखहितेरतः ॥७६॥ गयस्वामी स्थानवंशकर्ता
स्थानविभेदकृत् । पुरुषावययो भूमिर्विशे-
षविनिरूपकः ॥ ७७ ॥ जंबुद्वीपपति
र्मेरु नाभिपद्मरूहाश्रयः । नानाविभूति
लीलाढ्यो, गंगोत्पत्तिनिदानकृत् ॥ ७८ ॥
गंगामहात्महेतुश्च गंगारूपोऽतिगूढ़कृत् ।

वैकुंठदेहहेत्वंबुजन्मकृत्सर्वपावनः ॥ ७९ ॥
शिवस्वामी शिवोपास्यो गूढ़ः संकर्षणात्मकः ।
स्थानरक्षार्थमत्स्यादिरूपः सर्वैकपूजितः ॥८०॥
उपास्य नानारूपात्मा ज्योतिरूपोगतिप्रदः ।
सूर्यनारायणो वेदकान्तिरुज्ज्वलवेषधृत् ॥८१॥
हंसोंतरिक्षगमनः सर्वप्रसवकारणम् । आनन्द-
कर्ता वसुदोबुधोवाक्पतिरुज्ज्वलः ॥ ८२ ॥
कालात्मा कालकालश्च कालच्छेद कृदुत्तमः
शिशुमारः सर्वमूर्तिराधिदैविकरुपधृक् ॥८३॥
अनंतसुखभोगाढ्यो विवरैश्वर्यभाजनः ।
संकर्षणो दैत्यपतिः सर्वाधारो बृहद्वपुः ॥८४॥
अनंतनरकच्छेदी स्मृतिमात्रार्तिनाशनः ।
सर्वानुग्रहकर्ता च मर्यादाभिन्नशास्त्रकृत् ॥८५॥

अतः परं षष्ठ स्कन्धस्थ नामानि

कालांतकभयच्छेदी नामसामर्थ्यरूपधृत् ।
उद्धारानर्हगोपत्रात्मा नामादि प्रेरकोत्तमः॥८६॥
अजामिलमहादुष्टमोचकोऽघविमोचकः । धर्म-

वक्ताऽक्लिष्टवक्ता विष्णुधर्मस्वरूपधृत् ॥८७॥ सन्मार्गप्रेरको धर्ता त्यागहेतुरधोक्षजः वैकुंठ पुरनेता च दाससंवृद्धिकारकः ॥८८॥ दक्षः प्रसाद कृद्धंसगुह्यस्तुतिविभावनः । स्वाभिप्राय-प्रवक्ता च मुक्तजीवप्रसूतिकृत् ॥८९॥ नारद प्रेरणात्माचहर्यश्वब्रह्मभावनः । सुबलाश्वहितो गूढ़वाक्यार्थज्ञापनक्षमः ॥ ९० ॥ गूढ़ार्थज्ञापकः सर्वमोक्षानंदप्रतिष्ठितः । पुष्टि प्ररोहहेतुश्च दासैकज्ञातहृद्गतः ॥ ९१ ॥ शांतिकर्ता सुहितकृत्स्त्रीप्रसूः सर्वकामधुक् । पुष्टिवंश-प्रणेता च विश्व रूपेष्टदेवता ॥ ९२ ॥ कवचात्मा पालनात्मा वर्मोपचितिकारणम् । विश्वरूपशिरश्छेदा । त्वाष्ट्रयज्ञविनाशकः ॥९३॥ वृत्रस्वामीवृत्रगम्यो वृत्रव्रतपरायणः ॥ वृत्रकीर्तिर्वृत्रमोक्षोमघवत्प्राणरक्षकः ॥ ९४ ॥ अश्वमेधहविर्भोक्ता देवेंद्रामीवनाशकः । संसार-मोचकश्चित्र केतुबोधनतत्परः ॥९५॥ मन्त्र-

सिद्धिःसिद्धिहेतुः सृसिद्धफलदायकः । महादेव-तिरस्कर्ताभक्तयैपूर्वार्थ नाशकः ॥९६॥ देव-ब्राह्मणविद्वेषवैमुख्य ज्ञापकः शिवः । आदित्यो दैत्यराजश्च मरुत्पतिरचित्यकृत ॥९७॥ मरुतां भेदक स्त्राता व्रतात्मा पुंप्रसूतिकृत ॥

अतःपरं सप्तमस्कन्धस्थ नामानि

कर्मात्मा वासनात्मा च ऊतिलीलापरायणः ॥९८॥ समदैत्यसुरस्त्रात्मा वैषम्यज्ञानसंशयः देहाद्युपाधिरहितः सर्वज्ञः सर्वहेतुवित् ॥९९॥ ब्रह्मवाक् स्थापनपरः स्वजन्मावधिकार्यकृत । सदसद्वासनाहेतुस्त्रिः सत्यो भक्तमोचकः॥१००॥ हिरण्यकशिपुद्वेषी प्रविष्टात्मातिभीषणः । शान्ति-ज्ञानादिहेतुश्च प्रह्लादोत्पत्तिकारणः ॥१॥ दैत्य-सिद्धान्तसद्वक्ता तपःसार उदारधीः दैत्यहेतु प्रकटनो भक्तिचिह्नप्रकाशकः ॥२॥ सद्वेषहेतुः सद्वेषवासनात्मा निरंतरः ॥ नैष्ठुर्यसीमा प्रह्लादवत्सलः संगदोषहा ॥३॥ महानुभावः

साकारः सर्वाकारः प्रमाणभूः। स्तंभप्रसूतिर्नृहरि-
र्नृसिंहो भीमविक्रमः ॥४॥ विकटास्योललज्जिह्वो
नखशस्त्रो जवोत्कटः। हिरण्यकशिपुच्छेदी क्रूर-
दैत्यनिवारकः ॥५॥ सिंहासनस्थः क्रोधात्मा
लक्ष्मीभयविवर्धनः ब्रह्माद्यत्यंतभयभूरपूर्वा-
चिन्त्यरूपधृत् ॥६॥ भक्तैकशान्तहृदयोभक्त-
स्तुत्यः स्तुतिप्रियः ॥ भक्तांगलेहनोद्भूत क्रोध-
पुंजःप्रशान्तधीः ॥७॥ स्मृतिमात्रभयत्राता ब्रह्म-
बुद्धि प्रदायकः ॥ गोरूपधार्यमृतपाः शिवकीर्ति-
विवर्धनः ॥८॥ धर्मात्मा सर्वकर्मात्मा विशे-
षात्माऽऽश्रमप्रभुः ॥ संसारमग्नस्योद्धर्ता सन्मार्गा-
खिलतत्त्ववाक् ॥९॥ आचारात्मा सदाचारी ।

* अतः परं अष्टम स्कन्धस्थ नामानि *

मन्वन्तर विभावनः। स्मृत्याऽशेषा शुभ-
हरो गजेन्द्र स्मृति कारणं ॥१०॥ जातिस्म-
रणहेत्वेकपूजाभक्तिस्वरूपदः ॥ यज्ञो भया-
न्मनुत्राता विभुर्वह्व व्रताश्रयः ॥ ११ ॥

सत्यसेनो दुष्टघाती हरिर्गज विमोचकः ॥ वैकुण्ठलोककर्त्ता च अजितोऽमृतकारणं ॥१२॥ उरुक्रमोभूमिहर्ता सार्वभौमो बलिप्रियः ॥ विभुः सर्वहितेकात्माविष्वक्सेनः शिवप्रियः ॥ १३ ॥ धर्मसेतुर्लोकिधृतिः सुधामां तरपालकः । उपहर्ता योगपतिर्बृहद्भानुः क्रियापतिः ॥१४॥ चतुर्दश प्रमाणात्मा धर्मोमन्वादिबोधकः ॥ लक्ष्मी भोगैकनिलयो देवमंत्रप्रदायकः ॥१५॥ दैत्य व्यामोहकः साक्षाद्गरुणस्कन्धसंश्रयः ॥ लीलामंदरधारीच दैत्यवासुकिपूजितः ॥१६॥ समुद्रोन्मथनायत्तोऽविघ्नकर्त्ता स्ववाक्यकृत ॥ आदिकूर्मः पवित्रात्मामंदराऽऽघर्षणोत्सुकः ॥१७॥ श्वासैजदब्धि वार्वीचिः कल्पांतावधिकार्यकृत ॥ चतुर्दश महारत्नोलक्ष्मी सौभाग्यवर्धनः ॥ १८ ॥ धन्वंतरिः सुधाहस्तो यज्ञभोक्तार्तिनाशनः ॥ आयुर्वेद प्रणेताच देवदैत्याखिलार्चितः ॥ १९ ॥ बुद्धि-

व्यामोहकोदेव कार्यसाधनतत्परः ॥ स्त्रीरूपो मायया वक्ता दैत्यांतः करणप्रियः ॥२०॥ पायितामृतदेवांशोयुद्धहेतु स्मृतिप्रदः ॥ सुमालिमालिवधकृन्माल्यावत्प्राणहारकः ॥ २१ ॥ कालनेमिशिरश्छेदोदैत्ययज्ञविनाशकः ॥ इन्द्र सामर्थ्यदाता च दैत्यशेषस्थितिप्रियः ॥ २२ ॥ शिव व्यामोहको मायी भृगुमंत्र स्वशक्तिदः । बलिजीवनकर्त्ता च स्वर्ग हेतुर्व्रतार्चितः ॥२३॥ अदित्यानन्द कर्ता च कश्यपादिति संभवः । उपेन्द्रइन्द्रावरजो वामनो ब्रह्मरूपधृत ॥२४॥ ब्रह्मादि सेवित वपुर्यज्ञ पावनतत्परः ॥ याचूञोपदेशकर्ता च ज्ञापिताशेष संस्थितिः ॥२५॥ सत्यार्थप्रेरकः सर्वहर्ता गर्वविनाशकः त्रिविक्रमस्त्रिलोकात्मा विश्वमूर्तिः पृथुश्रवाः ॥२६॥ पाशबद्ध वलिः सर्वदैत्यपक्षोपमर्दकः ॥ सुतल स्थापित वलिः स्वर्गाधिक सुखप्रदः ॥२७॥ कर्मसंपूर्तिकर्ता च स्वर्गसंस्थापितामरः ॥ ज्ञात-

त्रिविधधर्मात्मा महामौनोऽब्धिसंश्रयः ॥२८॥
सत्यव्रतप्रियो गोप्ता मत्स्यमूर्तिधृतश्रुतिः। शृंग-
बद्धधृतक्षोणिः सर्वार्थज्ञापको गुरुः ॥२९॥

* अतः परं नवमस्कन्धस्थ नामानि *

ईशसेवकलीलात्मा सूर्यवंशप्रवर्तकः ।
सोमवंशोद्भवकरो मनुपुत्रगतिप्रदः ॥ ३० ॥
अंबरीषप्रियः साधुर्दुर्वासोगर्वनाशकः ॥ ब्रह्म-
शापोपसंहर्ता भक्तिकीर्तिविवर्धनः ॥ ३१ ॥
इक्ष्वाकुवंशजनकः सगराद्यखिलार्थदः । भगी-
रथमहायत्नौ गंगाधौतांघ्रिपंकजः ॥ ३२ ॥
ब्रह्मस्वामी शिवस्वामी सगरात्मजमुक्तिदः ।
खट्वांगमोक्षहेतुश्च रघुवंशविवर्धनः ॥३३॥
रघुनाथो रामचन्द्रो रामभद्रो रघुप्रियः ।
अनंतकीर्तिः पुण्यात्मा पुण्यश्लोकैकभास्करः
॥३४॥ कोशलेन्द्रः प्रमाणात्मा सेव्यो दशरथा-
त्मजः । लक्ष्मणो भरतश्चैव शत्रुघ्नो व्यूहविग्रहः
॥ ३५ ॥ विश्वामित्रप्रियो दांतस्ताटकावध-

मोक्षदः । वायव्यास्त्राब्धिनिक्षिप्तमारीचश्च सुबाहुहा ॥३६॥ वृषध्वजधनुर्भंगप्राप्तसीतामहोत्सवः । सीतापतिर्भृगुपतिर्गर्वपर्वतनाशकः ॥३७॥ अयोध्यास्थमहाभोगयुक्तलक्ष्मीविनोदवान् । कैकेयीवाक्यकर्ता च पितृवाक्परिपालकः ॥३८॥ वैराग्यबोधकोऽनन्यसात्विकस्थानबोधकः । अहल्यादुःखहारी च गुहस्वामी सलक्ष्मणः ॥३९॥ चित्रकूटप्रियस्थानो दंडकारण्यपावनः । शरभंगसुतीक्ष्णादिपूजितोऽगस्त्यभाग्यभूः ॥१४०॥ ऋषिसंप्रार्थितकृतिर्विराधवधपंडितः । छिन्नशूर्पणखानासः खरदूषणघातकः ॥४१॥ एकबाणो हतानेक सहस्रबलराक्षसः । मारीचघाती नियतस्सीतासंबंधशोभनः ॥४२॥ सीतावियोगनाट्यश्च जटायुर्वधमोक्षदः । शबरीपूजितो भक्तहनुमत्प्रमुखावृतः ॥४३॥ दुंदुभ्यस्थिप्रहरणः सप्ततालविभेदनः । सुग्रीवराज्यदो वालिघाती सागरशोषणः ॥४४॥ सेतुबंधनकर्ता च

विभीषणहितप्रदः । रावणादिशिरश्छेदी राक्षसाघौघनाशकः ॥ ४५ ॥ सीताभयप्रदाता च पुष्पकागमनोत्सुकः । अयोध्यापतिरत्यंतसर्वलोकसुखप्रदः ॥४६॥ मथुरापुरनिर्माता सुकृतज्ञस्वरूपदः । जनकज्ञानगम्यश्च ऐलांतप्रकटश्रुतिः ॥ ४७ ॥ हैहयांतकरो रामो दुष्टक्षत्रविनाशकः । सोमवंशहितैकात्मा यदुवंशविवर्धनः ॥४८॥

॥ अतःपरंदशमस्कन्धपूर्वार्धस्थनामानि ॥

परब्रह्मावतरणः केशवक्लेशनाशनः । भूमिभारावतरणो भक्तार्थाखिलमानसः ॥४९॥ सर्वभक्तनिरोधात्मा लीलानंतनिरोधकृत् । भूमिष्ठपरमानंदो देवकीशुद्धिकारणम् ॥ १५० ॥ वसुदेवज्ञाननिष्ठसमजीवनिवारकः । सर्ववैराग्यकरणस्वलीलाधारशोधकः ॥५१॥ मायाऽऽज्ञापनकर्ता च शेषसंभारसंभृतिः । भक्तक्लेशपरिज्ञाता तन्निवारणतत्परः ॥५२॥ आविष्टवसु-

देवांशो देवकीगर्भभूषणम् । पूर्णतेजोमयः पूर्णः कंसाधृष्यप्रतापवान् ॥५३॥ विवेकज्ञानदाता च ब्रह्माद्यखिलसंस्तुतः । सत्यो जगत्कल्पतरुर्नानारूपविमोहनः ॥५४॥ भक्तिमार्गप्रतिष्ठाता विद्वन्मोहप्रवर्तकः । मूलकालगुणद्रष्टा नयनानंदभाजनम् ॥५५॥ वसुदेवसुखाब्धिश्च देवकीनयनामृतम् । पितृमातृस्तुतः पूर्वसर्ववृत्तांतबोधकः ॥ ५६ ॥ गोकुलागतिलीलाश्रवसुदेवकरस्थितिः । सर्वेशत्वप्रकटनो मायाव्यत्ययकारकः ॥५७॥ ज्ञानमोहितदुष्टेशः प्रपंचास्मृतिकारणम् । यशोदानंदनोनंदभाग्यभूर्गोकुलोत्सवः ॥५८॥ नंदप्रियो नंदसूनुर्यशोदायाःस्तनंधयः । पूतनासुपयःपाता मुग्धभावातिसुंदरः ॥५९॥ सुंदरीहृदयानन्दो गोपीमंत्राभिमंत्रितः । गोपालाश्चर्यरसकृच्छकटासुरखंडनः ॥१६०॥ नंदव्रजजनानंदीनंदभाग्यमहोदयः । तृणावर्तवधोत्साहो यशोदाज्ञानविग्रहः ॥६१॥

बलभद्रप्रियःकृष्णः संकर्षणसहायवान्। रामानुजो वासुदेवो गोष्ठांगणगतिप्रियः ॥६२॥ किंकिणी-रवभावज्ञो वत्सपुच्छावलंबनः । नवनीतप्रियो गोपीमोहसंसारनाशकः ॥ ६३ ॥ गोपबालक-भावज्ञश्चौर्यविद्याविशारदः । मृत्स्नाभक्षण-लीलास्यमाहात्म्यज्ञानदायकः ॥६४॥ धराद्रोण प्रीतिकर्ता दधिभांडविभेदनः। दामोदरो भक्तव-श्यो यमलार्जुनभंजनः ॥६५॥ बृहद्वनमहाश्चर्यो वृंदावनगतिप्रियः । वत्सघाती बालकेलिर्बका-सुरनिषूदनः ॥ ६६ ॥ अरण्यभोक्ताप्यथवा बाललीलापरायणः। प्रोत्साहजनकश्चैवमघासुर-निषूदनः ॥६७॥ व्यालमोक्षप्रदः पुष्टो ब्रह्म-मोहप्रवर्धनः । अनन्तमूर्तिः सर्वात्मा जंगम-स्थावराकृतिः ॥६८॥ ब्रह्ममोहनकर्ता च स्तुत्य-आत्मा सदाप्रियः । पौगंडलीलाभिरतिर्गोचा-रणपरायणः ॥६९॥ वृन्दावनलतागुल्मवृक्ष-रूपनिरूपकः । नादब्रह्मप्रकटनो वयःप्रतिकृति-

स्वनः ॥७०॥ बर्हिनृत्यानुकरणो गोपालानुकृतिस्वनः। सदाचारप्रतिष्ठाता बलश्रमनिराकृतिः ॥७१॥ तरुमूलकृताशेषतल्पशायी सखिस्तुतः। गोपालसेवितपदः श्रीलालितपदांबुजः ॥७२॥ गोपसंप्रार्थितफलदाननाशितधेनुकः। कालीयफणिमाणिक्यरंजितश्रीपदांबुजः ॥७३॥ दृष्टिसंजीविताशेषगोपगोगोपिकाप्रियः। लीलासंपीतदावाग्निः प्रलंबवधपंडितः ॥ ७४ ॥ दावाग्न्यावृतगोपालदृष्ट्याच्छादनवह्निपः। वर्षा शरद्विभूतिश्रीर्गोपीकामप्रबोधकः ॥७५॥ गोपीरत्नस्तुताशेषवेणुवाद्यविशारदः। कात्यायनीव्रतव्याजसर्वभावाऽऽश्रितांगनः ॥ ७६ ॥ सत्संगतिस्तुतिव्याजस्तुतवृन्दावनांघ्रिपः। गोपक्षुच्छांतिसंव्याजविप्रभार्याप्रसादकृत् ॥७७॥ हेतुप्राप्तेंद्रयागस्वकार्यगोसवबोधकः। शैलरूपकृताशेषरसभोगसुखावहः ॥७८॥ लीलागोवर्द्धनोद्धारपालितस्वव्रजप्रियः। गोपस्व-

च्छन्दलीलार्थगर्गवाक्यार्थबोधकः ॥ ७९ ॥
इन्द्रधेनुस्तुतिप्राप्तगोविन्देन्द्राभिधानवान् ।
व्रतादिधर्मसंसक्तनंदिक्लेशविनाशकः ॥१८०॥
नन्दादिगोपमात्रेष्टवैकुंठगतिदायकः । वेणुवाद
स्मरक्षोभमत्तगोपीविमुक्तिदः ॥ १८१ ॥ सर्व-
भावप्राप्तगोपीसुखसंवर्धनक्षमः । गोपीगर्वप्रणा-
शार्थतिरोधानसुखप्रदः ॥ ८२ ॥ कृष्णभाव-
व्याप्तविश्वगोपीभावितवेषधृक् । राधाविशेष-
संभोगप्राप्तदोषनिवारकः ॥ ८३ ॥ परमप्रीति-
संगीतसर्वाद्भुतमहागुणः । मानापनोदनाक्रंद-
गोपीदृष्टिमहोत्सवः ॥ ८४ ॥ गोपीकाव्याप्त
सर्वांगः स्त्रीसंभाषाविशारदः । रासोत्सवमहा-
सौख्यगोपीसंभोगसागरः ॥८५॥ जलस्थल
रतिव्याप्तगोपीदृष्ट्यभिपूजितः । शास्त्रानपेक्ष-
कामैकमुक्तिद्वारविवर्धनः ॥८६॥ सुदर्शनमहा-
सर्पग्रस्तनंदविमोचकः । गीतमोहितगोपीधृक्
शंखचूडविनाशकः ॥८७॥ गुणसंगीतसंतुष्टि-

गोपीसंसारविस्मृतिः । अरिष्टमथनो दैत्यबुद्धि-
व्यामोहकारकः ॥८८॥ केशिघाती नारदेष्टोव्यो-
मासुरविनाशकः । अक्रूरभक्तिसंराद्धपादरेणुमहा-
निधिः ॥ ८९ ॥ रथावरोहशुद्धात्मा गोपीमान-
सहारकः । ह्रदसंदर्शिताशेषवैकुंठाक्रूरसंस्तुतः
॥ १९० ॥ मथुरागमनोत्साहो मथुराभाग्य-
भाजनम्॥ मथुरानगरीशोभादर्शनोत्सुकमानसः
॥९१॥ दुष्टरंजकघाती च वयकाचिंतविग्रहः ।
वस्त्रमाला सुशोभांगः कुब्जाऽऽलेपनभूषितः
॥ ९२ ॥ कुब्जासुरूपकर्ता च कुब्जारतिवर-
प्रदः । प्रसादरूपसंतुष्टहरकोदंडखंडनः ॥९३॥
शकलाहतकंसाप्तधनूरक्षकसैनिकः । जाग्र-
त्स्वप्नभयव्याप्तमृत्युलक्षणबोधकः ॥ ९४ ॥
मथुरामल्ल ओजस्वी मल्लयुद्धविशारदः । सद्यः
कुवलयापीडघाती चाणूरमर्दनः ॥ ९५ ॥
लीलाहतमहामल्लः शलतोशलघातकः ।
कंसांतकोजितामित्रो वसुदेवविमोचकः ॥९६॥

ज्ञाततत्त्वपितृज्ञानमोहनामृतवाङ्मयः । उग्र-
सेनप्रतिष्ठाता यादवाऽऽधिविनाशकः ॥९७॥
नंदादिसांत्वनकरो ब्रह्मचर्यव्रते स्थितः ।
गुरुशुश्रूषणपरो विद्यापारमितेश्वरः ॥९८॥
सादीपनिमृतापत्यदाता कालातकादिजित् ।
गोकुलाश्वासनपरो यशोदानंदपोषकः ॥९९॥
गोपिकाविरहव्याजमनोगति रतिप्रदः ॥ समो-
द्धवभ्रमरवाग्गोपिकामोहनाशकः ॥ २०० ॥
कुब्जारतिप्रदोऽक्रूरपवित्रीकृतभूग्रहः । पृथा-
दुःखप्रहाता च पांडवानां सुखप्रदः ॥ १ ॥

अथ दशमस्कन्धोत्तरार्द्धस्थनामानि

जरासंधसमानीतसैन्यघाती विधारकः । यवन-
व्याप्तमथुराजनदत्तकुशस्थलिः ॥२॥ द्वारका-
द्भुतनिर्माणविस्मापितसुरासुरः । मनुष्यमात्र
भोगार्थभूम्यानीतेंद्रवैभव ॥३॥ यवनव्याप्तमथु-
रानिर्गमानंदविग्रहः ॥ मुचुकुंदमहाबोधयवन-

प्राणदर्पहा ॥ ४ ॥ मुचुकुंदस्तुताशेषगुणकर्म-
महोदयः । फलप्रदानसंतुष्टिर्जन्मांतरित-
मोक्षदः ॥ ५ ॥ शिवब्राह्मणवाक्यात्तजयभीति-
विभावनः । प्रवर्षणप्रार्थिताग्निदानपुण्य-
महोत्सवः ॥ ६ ॥ रुक्मिणीरमणः कामपिता
प्रद्युम्नभावनः ॥ स्यमंतकमणिव्याजप्राप्तजांबु-
वतीपतिः ॥ ७ ॥ सत्यभामाप्राणपतिः कालिं-
दीरतिवर्धनः । मित्रविन्दापतिः सत्यपतिर्वृष-
निषूदनः ॥ ८ ॥ भद्रावांछितभर्ता च लक्ष्म-
णावरणक्षमः । इन्द्रादिप्रार्थितवधनरकासुर-
सूदनः ॥ ९ ॥ मुरारिः पठिहंता च ताम्रादि-
प्राणहारकः । षोडशस्त्रीसहस्त्रेशश्छत्रकुंडल-
दानकृत् ॥ २१० ॥ पारिजातापहरणो देवेंद्र-
मदनाशकः । रुक्मिणीसमसर्वस्त्रीसाध्यभोग-
रतिप्रदः ॥ ११ ॥ रुक्मिणीपरिहासोक्ति-
वाक्तिरोधानकारकः । पुत्रपौत्रमहाभाग्य
गृहधर्मप्रदर्शकः ॥ १२ ॥ शंबरातकसत्पुत्र-

विवाहहृतरुक्मिकः । उषापहृतपौत्रश्रीर्बाण-
बाहुनिवारकः ॥ १३ ॥ शतज्वरभयव्याप्तज्वर-
संस्तुतषड्गुणः । शंकरप्रतियोद्धा च द्वन्द्वयुद्ध
विशारदः ॥१४॥ नृगपापप्रभेत्ता च ब्रह्मस्व
गुणदोषदृक् । विष्णुभक्तिविरोधैकब्रह्मस्वावि-
निवारकः ॥१५॥ बलभद्राहितगुणो गोकुल
प्रीतिदायकः । गोपीस्नेहैकनिलयो गोपीप्राण-
स्थितिप्रदः ॥ १६ ॥ वाक्यातिगामियमुना-
हलाकर्षणवैभवः । पौंड्रकत्याजितस्पर्धः
काशिराजविभेदनः ॥ १७ ॥ काशी-
निदाहकरणः शिवभस्मप्रदायकः । द्विविद-
प्राणघाती च कौरवाखर्वगर्वनुत् ॥१८॥
लांगलाकृष्टनगरीसंविग्नाखिलनागरः । प्रपन्ना-
भयदः सांबप्राप्तसन्मानभाजनम् ॥१९॥
नारदान्विष्टचरणो भक्तविक्षेपनाशकः । सदा-
चारैक निलयः सुधर्माध्यासितासनः ॥२०॥
जरासंधावरुद्धेन विज्ञापितनिजक्रमः । मंत्र्युद्ध-

वाद्युक्तवाक्यप्रकारैकपरायणः ॥२१॥ राज-
सूयादिमखकृत्संप्रार्थितसहायकृत् । इन्द्रप्रस्थ-
प्रयाणार्थमहासंभारसंभृतिः ॥२२॥ जरासंध-
वधव्याजमोचिताशेषभूमिपः । सन्मार्ग-
बोधको यज्ञक्षितिवारणतत्परः ॥२३॥ शिशुपा-
लहतिव्याजजयशापविमोचकः । दुर्योधना-
भिमानाब्धिशोषबाणवृकोदरः ॥२४॥ महा-
देवपरप्राप्तपुरशाल्व विनाशकः । दंतवक्रवध-
व्याजविजयाघौघनाशकः ॥२५॥ विदूरथ-
प्राणहर्ता न्यस्तशस्त्रास्त्रविग्रहः । उपधर्मविलि-
प्तांगसूतघाती वरप्रदः ॥२६॥ बल्वलप्राण-
हरणपालितर्षिश्रुतिक्रियः । सर्वतीर्थाघनाशार्थ-
तीर्थयात्राविशारदः ॥ २७ ॥ ज्ञानक्रियाविभे-
देष्ट फलसाधनतत्परः । सारथ्यादिक्रियाकर्ता
भक्तवश्यत्वबोधकः ॥२८॥ सुदामरंकभार्यार्थ-
भूम्यानीतेंद्रवैभवः । रविग्रहनिमित्तासकुरुक्षेत्रैक-
पावनः ॥२९॥ नृपगोपीसमस्तस्त्रीपावनार्था-

खिलक्रियः । ऋषिमार्गप्रतिष्ठाता वसुदेवमख-क्रियः ॥२३०॥ वसुदेवज्ञानदाता देवकीपुत्र दायकः । अर्जुनस्त्रीप्रदाता च बहुलाश्वस्व-रूपदः ॥३१॥ श्रुतदेवेष्टदाता च सर्वश्रुति-निरूपितः ॥ महादेवाद्यतिश्रेष्ठो भक्तिलक्षण-निर्णयः ॥३२॥ वृकग्रस्तशिवत्राता नानावा-क्यविशारदः । नरगर्वविनाशार्थंहृतब्राह्मण-बालकः ॥३३॥ लोकालोकपरस्थानस्थित-बालकदायकः । द्वारकास्थमहाभोगनानास्त्री रतिवर्द्धनः ॥३४॥ मनस्तिरोधानकृतव्यग्र-स्त्रीचित्तभावितः ।

॥ अतः परमेकादशस्कन्धस्थ नामानि ॥

मुक्तिलीलाविहरणो मौसलव्याजसंहृतिः ॥३५॥ श्रीभागवतधर्मादिबोधको भक्तिनीति-कृत् । उद्धवज्ञानदाता च पंचविंशतिधागुरुः ॥३६॥ आचारमुक्तिभक्त्यादिवक्ता शब्दोद्भव-

स्थितिः ॥ हंसो धर्मप्रवक्ता च सनकाद्युपदेशकृत् ॥३७॥ भक्तिसाधनवक्ता च योगसिद्धिप्रदायकः । नानाविभूतिवक्ता च शुद्धधर्मावबोधकः ॥३८॥मार्गत्रयविभेदात्मा नानाशंकानिवारकः । भिक्षुगीताप्रवक्ता च शुद्धसांख्यप्रवर्तकः ॥३९॥ मनोगुणविशेषात्मा ज्ञापकोक्तपुरूरवाः । पूजाविधिप्रवक्ता च सर्वसिद्धान्तबोधकः ॥२४०॥ लघुस्वमार्गवक्ता च स्वस्थानगतिबोधकः ॥ यादवांगोपसंहर्ता सर्वाश्चर्यगतिक्रियः ॥४१॥

॥ अतः परं द्वादशस्कन्धस्थनामानि ॥

कालधर्मविभेदार्थवर्णनाशनतत्परः । बुद्धो गुप्तार्थवक्ता च नानाशास्त्रविधायकः ॥४२॥ नष्टधर्ममनुष्यादिलक्षणज्ञापनोत्सुकः । आश्रयैकगतिज्ञाता कल्किः कलिमलापहः ॥ ४३ ॥ शास्त्रवैराग्यसंबोधो नानाप्रलयबोधकः । विशेषतः शुकव्याजपरीक्षिज्ज्ञानबोधकः

॥४४॥ शुकेष्टगतिरूपात्मा परिक्षिद्देहमोक्षदः ।
शब्दरूपो नादरूपो वेदरूपो विभेदनः ॥४५॥
व्यासः शाखाप्रवक्ता च पुराणार्थप्रवर्तकः ।
मार्कंडेयप्रसन्नात्मा वटपुत्रपुटेशयः ॥४६॥
मायाव्यासमहामोहदुःखशान्तिप्रवर्तकः ।
महादेवस्वरूपश्च भक्तिदाता कृपानिधिः ॥४७॥
आदित्यांतर्गतः कालो द्वादशात्मासुपूजितः ।
श्रीभागवतरूपश्च सर्वार्थफलदायकः ॥४८॥
इतीदं कीर्तनीयस्य हरेर्नामसहस्रकम् ।
पंचसप्ततिविस्तीर्णं पुराणान्तरभाषितम् ॥४९॥
य एतत्प्रातरुत्थाय श्रद्धावान्सुसमाहितः ।
जपेदर्थाहितमतिः सगोविन्दपदंव्रजेत ॥२५०॥
सर्वधर्मविनिर्मुक्तः सर्वसाधनवर्जितः । एतद्धारणमात्रेण कृष्णस्य पदवीं व्रजेत् ॥५१॥ हर्यावेशितचित्तेन श्रीभागवतसागरात् । समुद्धृतानि नामानि चिंतामणिनिभानि हि ॥५२॥
कंठस्थितान्यर्थदीप्त्या बाधंतेऽज्ञानजंतमः । भक्तिं

श्रीकृष्णदेवस्य साधयंति विनिश्चितम् ॥५३॥ किं बहूक्तेन भगवान्नामभिः स्तुतषड्गुणः। आत्मभावं नयत्याशु भक्तिं च कुरुते दृढाम् ॥५४॥ यः कृष्णभक्तिमिह वांछति साधनौघैर्नामानि भासुरयशांसि जपेत्स नित्यम्। तंवै हरिः स्वपुरुषं कुरुतेऽतिशीघ्रमात्मार्पणं समधिगच्छति भावतुष्टः ॥५५॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य। गोविन्द गोपवनिताव्रजभृत्यगीततीर्थश्रवः श्रवणमंगल पाहि भृत्यान् ॥२५६॥ इति श्रीभागवतसारसमुच्चये वैश्वानरोक्तं पुरुषोत्तमनाम्नां सहस्रं संपूर्णम् ॥ शुभमस्तु ॥

सूचना

श्री आचार्य महाप्रभुजी के सेवक चौरासी वैष्णवों की वार्ता व्रजभाषा में होने के कारण परम भगवदीय साधारण शिक्षित वैष्णवजन एवं वैष्णव महिलाओं को पढ़ने व भाव समझने में कष्टसाध्य जानकर श्रीमती श्रीकृष्णप्रिया बेटीजी महाराज ने कृपा करके भगवदीयों के वार्ता का भाव सुरक्षित रखते हुये वैष्णवों के लाभार्थ हिन्दी में अविकल अनुवाद करके प्रकाशित करने की आज्ञा प्रदान की है। इस पुस्तक का लागत मात्र उचित न्योछावर ।) प्रति।

अतः शीघ्र ग्राहक बनकर वैष्णव अपनी अपनी प्रति सुरक्षित करा लेवें, नहीं तो समय की प्रतीक्षा करनी पड़ेगी। समय की प्रतीक्षा कितनी असह्य होती है यह तो आपलोगों को विदित ही है।

प्राप्तिस्थान—
नं० ३२।३९ राधामोहन कुंज,
भैरोनाथ, बनारस।

श्रीमदनमोहन पुस्तकालय

श्रीमती श्रीकृष्णप्रिया बेटीजी महाराज ने वैष्णव जनता की सुविधा के लिये अपने मन्दिर में इस संस्था की स्थापना की है। इस संस्था के द्वारा ग्रन्थों के प्रकाशन का तथा प्रचार का कार्य किया जायगा। प्रथम षोडष ग्रन्थ का प्रकाशन किया गया था। द्वितीय प्रकाशन श्री मोहन भजनमाला, तृतीय प्रकाशन उपदेश पुस्तिका : यह चतुर्थ प्रकाशन पुरुषोत्तम सहस्रनाम है। श्रीकृष्ण कार्यालय के ग्रन्थ भी प्रचारार्थ रक्खे हैं और सुविधानुसार अन्य प्रकाशकों के भी ग्रन्थ रखकर प्रचार किया जायगा।

१—षोडषग्रन्थ बड़े टाइपों में	न्यो०	।=)
२—अष्टाक्षर ग्रन्थमाला	न्यो०	।=)
३—श्रीमोहन भजनमाला	न्यो०	॥)
४—वैष्णवसर्वस्व	न्यो०	।=)
५—षोडषग्रन्थ विविधस्तोत्राणि	न्यो०	।=)
६—श्रीवल्लभाख्यान हिन्दी भाषान्तर	न्यो०	॥)
७—सिद्धान्तरहस्य विवेचन	न्यो०	।=)
८—श्रीगोपीगीत चतुष्टय	न्यो०	।=)
९—पुरुषोत्तम सहस्रनाम	न्यो०	।)

मार्गव्यय वी० पी० व्यय पृथक! प्रचार के लिये अधिक मँगानेवाले पत्रव्यवहार करें।

व्यवस्थापक

मदनमोहन पुस्तकालय

नं० ३२।३९ राधामोहन कुंज,

भैरोनाथ, बनारस।